योगवासिष्ठः/प्रकरणम् ६ (निर्वाणप्रकरणस्य उत्तरार्धम्)/सर्गः २११

एकादशाधिकद्विशततमः सर्गः २११

श्रीवसिष्ठ उवाच ।

इति तत्रोपविश्याहं पूजितस्तेन भूभुजा ।

प्रयोजनं स्वं संपाद्य स्वर्गन्तुं गगनं प्लुतः ।। १

अद्यैतद्भवता प्रोक्तं मया मतिमतां वर ।

अनया सुदृशा शान्तमनाः स्वात्मा भविष्यसि ।। २

ब्रह्मैव तदिदं सर्वं निर्नामैवामलं नभः ।

किमप्येवाजमाशान्तमादिमध्यान्तवर्जितम् ।। ३

चिद्भानमात्रमित्युक्तं ब्रह्मेति कलिताभिधम् ।

परात्परमिति प्रोक्तं तत्तु निर्नामकं पदम् ।। ४

श्रीराम उवाच ।

सिद्धसाध्ययमब्रह्मविद्याधरदिवौकसाम् ।

ब्रह्मन्कथय दृश्यन्ते लोका लोकधराः कथम् ।। ५

श्रीवसिष्ठ उवाच ।

सिद्धसाध्ययमब्रह्मविद्याधरदिवौकसाम् ।

अन्येषामपि भूतानामपूर्वाणां महात्मनाम् ।। ६

प्रतिरात्रं प्रतिदिनं पुरः पश्चादुपर्यधः ।

पश्यस्यालोकयँल्लोकानपश्यंश्च न पश्यसि ।। ७

एते लोकाः किलैतेषां नाभ्यासः स्थानदूरगाः ।

एते संकल्पलोकाख्या व्याप्तमेभिः किलाखिलम् ।।८

यथैते कल्पनालोका अयं लोकस्तथैव नः ।

यथा काल्पनिको वातो लोकालोकास्तथैव ते ।। ९

संकल्पस्वप्नलोका ये तव भान्ति दिवानिशम् ।

त एव तादृशाश्चान्ये संकल्पेन स्थिरीकृताः ।। १०

ध्यानेन त्वमपीतांश्चेत्स्थिरतां सुस्थिरात्मना ।

नयस्याशु तदेवैते स्थिरतां यान्त्यविघ्नतः ।। ११

यथाभिमतविस्तारा यथाभिमतसंपदः ।

संकल्पभाववलितो जनः पश्यति सिद्धवत् ।। १२

किंतु ते स्थिरतां नीताः सिद्धैः स्वर्यानसंपदा ।

अस्थिरैर्ध्यानविश्रान्तौ तैर्दुःखैस्तदमी कृताः ।। १३

जगदप्रतिघं सर्वं शान्तचिद्व्योम सर्वदा ।

यथा दृढं संविदितं तथैवाभाति नान्यथा ।। १४

न भात्येवासंविदितमस्ति नास्ति न चोद्यता ।

शून्यं ह्यप्रतिघं चैतत्पराकाशमरोधकम् ।। १५

चित्स्वभावतया भातं भारूपमिव दृश्यते ।

अस्मिंश्चिदभिमानश्च विद्यते न स्वभावतः ।। १६

कार्यकारणभावाच्चेत्कथैवात्र न विद्यते ।

व्योम्नोऽनन्तस्य सिद्धस्य किं कथं किल जायते ।। १७

यच्च जातमिवाभाति व्योम्नि व्योमैव तत्तथा ।

तत्रैकद्वित्वकलना कीदृशी स्यादरूपिणी ।। १८

तद्धि यादृशमेवासीत्तादृगेवावतिष्ठते ।

निर्विकारं यथा स्वप्ने व्योमैवाचलवद्भवेत् ।। १९

संकल्पे चित्तमाकारं यथोदेत्यद्रिलीलया ।

न च सोऽद्रिर्न तद्व्योम तथा ब्रह्म जगत्स्थितिः ।।२०

काष्ठवन्मौनमास्थाय रटन्तोऽपि महाधियः ।

इह व्यवहरन्त्येते बुधा दारुनरा इव ।। २१

यथा वारिणि वर्तन्ते तरङ्गावर्तवृत्तयः ।

अनन्याः परिवर्तन्ते तथा ब्रह्मणि सृष्टयः ।। २२

यथा वायौ परिस्पन्दा यथा व्योमनि शून्यता ।

अनन्याश्चाप्यमूर्ताश्च तथा ब्रह्मणि सृष्टयः ।। २३

यथा संकल्पनगरं शून्यमेव पुरं स्थितम् ।

साकारमप्यनाकारं ब्रह्मणीदं तथा जगत् ।। २४

चिरानुभूतमप्यर्थकार्यपीदं जगत्त्रयम् ।

शून्यमेव निराकारं संकल्पनगरं यथा ।। २५

यदेव चित्तसंकल्पस्तदेव नगरं यथा ।

तदा तथायं ब्रह्माच्छं तदेव जगदुच्यते ।। २६

चिरं नित्यानुभूतोऽपि जगदर्थो न किंचन ।

विद्यते पुरुषस्येह स्वप्ने स्वमरणं यथा ।। २७

स्वप्ने पुंसा मृतेनापि स्वदाहो दृश्यते यथा ।

असदेव सदाभासं जगद्दृष्टं परे तथा ।। २८

जगत्ता चाजगत्ता च परस्यैवामलं वपुः ।

पराभिधानं च परं न च सत्परमार्थतः ।। २९

इत्थमस्तु यदि वान्यथास्तु वा

मैव भूद्भवतु कोऽत्र संभ्रमः ।

मुञ्च फल्गुनि फले फलग्रहं

बुद्धवानसि कृतं परिश्रमैः ।। ३०

इत्यार्षे श्रीवासिष्ठमहारामायणे वाल्मीकीये दे० मो० नि० उ० परमार्थोपदेशो नामैकादशाधिकद्विशततमः सर्गः ।। २११ ।।